त्वं भूतेजोजलवृत्ति तद्द्विविधं नैमित्तिकं नैसर्गिकं भूतेजसो घृतादिसुवर्णयोरग्निसंयोगेन
द्रवत्वो भूतेजनैमित्तिकं जलेनैसर्गिकं स्नेह स्निग्धकणता जलमात्रवृत्तिः अणुकार्येकारणगुण
पूर्वकः गुरुत्वादिवत् अपावद्द्रव्यभावी शब्दः श्रोत्रग्राह्यः आकाशस्यविशेषगुणः ननु कथम
स्य श्रोत्रेण ग्रहणं यतो भेर्यादिदेशे शब्दो जायते श्रोत्रं तु पुरुषदेशे किं तत्त्वम् भेरीदेशेजा
तः शब्दो वीचीतरंगन्यायेन कदंबमुकुलकन्यायेन वा सन्निहितं शब्दांतरमिति क्रमेण श्रो
त्रदेशे जातो यः शब्दः श्रोत्रेण गृह्यते नाद्यो नापि मध्यमः भेरीशब्दो मया गृह्यत इति प्रतीतिरू
भ्रांतैव भेरीशब्दोत्पत्तौ भेर्याकाशसंयोगो ऽसमवायिकारणं भेरीदंडसंयोगो निमित्तकारणं
आकाशं समवायिकारणम् वंशोत्पाटनोत्पन्नचटपटशब्दोत्पत्तौ वंशदलाकाशविभागो ऽस
मवायिकारणं वंशदलद्वयविभागो निमित्तकारणं आकाशं समवायिकारणम् तेनाद्यः शब्दः
संयोगजो विभागजो वा अंत्यमध्यशब्दास्तु आकाशसमवायिकारणकाः अनुकूलवातनिमित्ताः

२० तथा चोक्तम् संयोगाद्विभागाच्छब्दाच्च शब्दनिष्पत्तिः आद्यादीनां शब्दानामाकाशमेव समवायिकार
णं कर्णबुद्धिवत् चिरक्षणावस्थायित्वं अन्त्योपान्त्यमध्यमशब्दाः स्वकार्यशब्दनाश्याः अत्र कश्चिद्वदति अं
त्यस्य द्वितीयक्षणानुगामिनास्तित्वक्षणे चासत्त्वोत्पन्नाशजननासंभवात् तस्माद्विनश्यदवस्थेनै
वोपान्त्येन तन्नाशजननं सुकरं अन्त्यपाकजवध्यादीनां नाश्यनाशकभावो न स्यात् इदं तु फलबला
देव कल्प्यते तस्मादुपान्त्यनाशादन्त्यनाश इति विनाशित्वं शब्दस्यानुमानात् तथाहि शब्दोऽनि
त्यः सामान्यवत्त्वे सत्यस्मदादिबाह्येन्द्रियप्रत्यक्षत्वहेतुः प्रत्यक्षादिस्तु च माने आत्मनि व्यभिचारः
स्यतो बाह्येन्द्रियेति एवमपि योगिबाह्येन्द्रियग्राह्ये परमाणौ व्यभिचारः स्यादित्यतो योगिनिरासार्थम
स्मदादीति किं पुनर्योगिसद्भावे प्रमाणमुच्यते परमाणवः कस्यचित् प्रत्यक्षाः प्रमेयत्वात् घटवत्
यस्य प्रत्यक्षाः स योगी तथा सामान्यादिना व्यभिचारः स्यादित्यत उक्तं सामान्यवत्त्वे सतीति सामान्य
दिषु च यस्मान्निःसामान्यत्वात् अर्थप्रकाशो बुद्धिः सा च द्विविधा नित्याऽनित्या च नित्या चेश्वरबुद्धिः अ

प्रोऽपि कारकः सत्प्रतिपक्षो हेत्वाभासः एवं यत्र व्यभिचारादयः ते पुनर्व्याप्तिपक्षधर्मताविशिष्टहेतुस्व
रूपज्ञप्रभावेन युक्ता असिद्धादयो दोषदुष्टा ज्ञप्तिकारका इति यावत् तथा च तत्रासिद्धस्त्रिविधः आश्र
यासिद्धः स्वरूपासिद्धो व्याप्यत्वासिद्धश्चेति तत्र यस्य हेतोराश्रयो नावगम्यते स आश्रयासिद्धः यथा गग
नारविंदं सुरभि अरविंदत्वात् सरोजारविंदवदिति अत्र हि गगनारविंदमाश्रयः स तु नास्त्येव अ
यमप्याश्रयासिद्धः तथा हि घटोऽनित्यः कार्यत्वात् पटवत् ननु आश्रयस्य सत्त्वात् कार्यत्वादिति हेतुर्ना
श्रयासिद्धः सिद्धसाधनं तु स्यात् सिद्धस्य घटानित्यत्वस्य साधनात् नैवं न हि स्वरूपेण कश्चिदाश्रयो भ
वत्यनुमानस्य किंतु संदिग्धसाध्यधर्मत्वेन तथा चोक्तं नाप्रकृते नानुपलब्धे न निर्णीतेऽर्थे किंतु सं
दिग्धेऽर्थे न्यायः प्रवर्तते न च घटे अनित्यत्वसंदेहोऽस्ति अनित्यत्वस्य निश्चितत्वात् तेन स्वरूपेण पक्ष
पि घटो वर्तते तथापि अनित्यत्वसंदेहाभावात् नासावाश्रय इति तस्मात् आश्रयासिद्धत्वाद्धेतु[illegible]
स्वरूपासिद्धस्तु उच्यते यो हेतुराश्रये नावगम्यते यथा सामान्यमनित्यं कृतकत्वात् कृतकत्वं हेतुरा

न्यूनाधिकापसिद्धांतहेत्वाभासपंचकं चेत्यष्टौ इति ग्रहाः ॥ उभयसाधनवती विजिगीषुकथा जल्पः सच यथा
संभवं सर्वैर्निग्रहस्थानानामधिकरणं परपक्षे दूषिते स्वपक्षसाधनप्रयोगावसानश्च जल्पः सच य
थासंभवं स्वपक्षस्थापनाहीनो वितंडा परपक्षदूषणमात्रावसाना नास्य वैतंडिकस्य स्थाप्यः स्वपक्षोस्ति
कथानाम नानावक्तृकपूर्वोत्तरपक्षप्रतिपादकवाक्यसंदर्भः ॥ उक्तानां पक्षधर्मत्वादीनां रूपाणां म
ध्ये एकेनापि रूपेण हीना अप्रसिद्धहेतवस्तेपि कतिपयरूपयोगाद्धेतुवदवभासमाना हेत्वाभासाः ते चा
सिद्धविरुद्धानैकांतिकप्रकरणसमकालात्ययापदिष्टभेदात्पंचैव ॥ अत्रोदयेनेन व्याप्यस्य हेतोः पक्ष
धर्मतयाप्रतीतिः सिद्धत्वदभावो सिद्धिरिति असिद्धलक्षणमुक्तं तच्च यद्यपि विरुद्धादिष्वपि संभव
तीति सांकर्यं प्रतीयते तथापि प्रधानसांकर्यं तु ॥ उच्यते यो हि यत्र साधने दोषः पुरतः स्फुरति सन्निधि
त्वदुष्टज्ञप्तौ स एव दुष्टज्ञप्तिकारको दूषणमिति यावत् नान्यस्तेनैव पुरःस्फूर्तिकेन दुष्टज्ञप्तौ जातायां
कार्यापर्यवसाने ज्ञाते तदुपजीविनोऽन्यस्यानुपयोगात् तथा च सति पक्षविरोधः साध्यविपर्ययव्या